## हलि लोपः । (११३/३४७)

हलादौ विभक्तौ परतः इदमोऽककारस्य इद्रूपस्य लोपो भवति । आभ्याम् । एभिः । एभ्यः । एषाम् । एषु । 'नानर्थकेऽलोन्त्यविधिः' (व्या. प. ६२) इति सर्वस्य अयम् इद्रूपस्य लोपः । [1]अथ वा नायम् इल्लोपः । 'अनाप्यकः' (७. २. ११२/३४६) इति अन्ग्रहणमनुवर्तते[2] ॥

## मृजेर्वृद्धिः । (११४/२४७३)

विभक्तौ इति निवृत्तम् । मृजेरङ्गस्य इको वृद्धिर्भवति । मार्ष्टा । मार्ष्टुम् । मार्ष्टव्यम् । मृजेरिति धातुग्रहणमिदम्, धातोश्च[3] कार्यमुच्यमानं धातुप्रत्यय एव वेदितव्यम् । तेन कंसपरिमृड्भ्याम्, कंसपरिमृड्भिः इत्यत्र न भवति ॥

## अचो ञ्णिति । (११५/२५४)

अजन्तस्य अङ्गस्य ञिति णिति च [4]प्रत्यये वृद्धिर्भवति । ञिति–एकस्तण्डुलनिश्चायः । [5]द्वौ शूर्पनिष्पावौ । [6]कारः । हारः । णिति – गौः, गावौ, गावः । सखायौ, सखायः । जैत्रम् । यौत्रम् । च्यौत्नः । जयतेर्यौतेश्च 'उणादयो बहुलम्' (३. ३. १/३१३९) इति ष्ट्रन् प्रत्ययः । च्यवतेरपि त्नण् ॥

## अत उपधायाः । (११६/२२८२)

[7]अङ्गोपधाया अकारस्य स्थाने ञिति णिति च प्रत्यये वृद्धिर्भवति । पाकः । त्यागः । [8]यागः । पाचयति । पाचकः । पाठयति । पाठकः । अतः इति किम् ? भेदयति । [9]भेदकः । उपधायाः इति किम् ? चकासयति तक्षकः ॥

## तद्धितेष्वचामादेः । (११७/१०७८)

तद्धिते ञिति णिति च प्रत्यये परतोऽङ्गस्य अचाम् आदेः अचः स्थाने वृद्धिर्भवति । गार्ग्यः । वात्स्यः । [10]दाक्षिः । प्लाक्षिः । णिति – औपगवः । कापटवः । [11]त्वाष्ट्रः, जागतः इत्यत्र अचामादेर्वृद्धिरन्त्योपधालक्षणां वृद्धिं बाधते ॥

## किति च । (११८/१०७६)

किति च तद्धिते परतोऽङ्गस्याचाम् आदेः अचः स्थाने वृद्धिर्भवति । 'नडादिभ्यः फक्' (४. १. ९९/११७१) नाडायनः । चारायणः । 'प्राग्वहतेष्ठक्' (४. ४. १/१५४८) आक्षिकः । शालाकिकः ॥

इति काशिकायां वृत्तौ सप्तमाध्यायस्य
द्वितीयः पादः ॥

---

1. अथ वा अयमनोऽलोऽन्त्यलोपः क. इ. 2. अक इत्येव इमकाभ्याम्, इमकेभिः इत्यधिकम् क. इ. 3. च नास्ति क. 4. स्थाने ब. 5. द्वावपूपनिष्पावौ क. 6. कारकः हारकः ब. क. 7. अङ्गस्य उपधाया ब. 8. रागः ह. 9. नास्ति ब. 10. नास्ति क. 11. वाष्ट्रः यादवः क.